*M.A.-I/SNS-101C/18*

# M.A. 1st Semester Examination, 2018

## SANSKRIT

## Paper : 101C

## Course ID : 10951

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

### Unit-I

**(ऋग्वेदे प्रश्नाः)**

**1.** ऋषिच्छन्दोदेवतानिर्देशपुरस्सरं निम्नोद्धृतेषु मन्त्रेषु *द्वयोः* व्याख्याकार्या। 5×2=10

(a) अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्।
होता॑रं रत्न॒धात॑मम्।।

(b) यः पृ॑थि॒वीं व्यथ॑माना॒मदृं॑ह॒द्यः पर्व॑ता॒न्प्रकु॑पिताँ॒ अर॑म्णात्।
यो अ॒न्तरि॑क्षं वि॒म॒मे वरी॑यो॒ यो द्याम॒स्त॑भ्ना॒त्स जना॑स॒ इन्द्रः॑।।

(c) अच्छा॒ सिन्धुं॑ मा॒तृत॑मामयासं॒ विपा॑शमु॒र्वीं सु॒भगा॑मगन्म।
व॒त्समि॑व मा॒तरा संरिहा॒णे स॑मा॒नं योनि॒मनु॒ सं॒चर॑न्ती।।

(d) स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात्।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम्।।

**2.** अधोस्थितेषु यथेच्छं *पञ्चप्रश्नानाम्* उत्तरं देयम्। 2×5=10

(a) ''स जना॑स॒ इन्द्रः॑'' इति मन्त्रांशस्य कोऽभिप्रायः?

(b) ''अग्निना —— अश्नवत् —— ——। यशसं ——।।'' इति प्रस्तुतमन्त्रः पूर्यताम्।

(c) इन्द्र शब्दस्य निर्वचनं लिख्यताम्।

(d) ''यः सूर्यं य उषसं जजानयो अपां नेता''—
— इतिमन्त्रस्य उत्सो निरूप्यताम्।

(e) विश्वमित्रनदीसंवादसूक्ते प्रवहमाननदीद्वयस्य नामोलेख्यताम्।

(f) ''किमावरीव कुह कस्य शर्मन्नम्भः''— इत्यस्य मन्त्रांशस्य उत्सं विलिख्य ऋषिच्छन्दोदेवता लिख्यताम्।

(g) चतुर्वर्णाः कस्मात् कथञ्च उत्पद्यन्ते?

(h) सप्तसिन्धुनामानिलेख्यानि।

## Unit-II

### (ऋग्वेदभाष्यभूमिकायां प्रश्नाः)

**3.** मन्त्रभागस्य प्रामाण्यं सायणदिशा प्रतिपाद्यनाम्। 10

*अथवा,*

वेदस्य लक्षणं प्रमाणञ्चास्ति न वेति संशय : —
सायणदिशा वर्णनीयः।

*अथवा,*

अभ्यर्हितत्वादृग्वेदस्यैव व्याख्यानमादावुचितमिति विषयाश्रित्य पूर्वोत्तरपक्षयोः मतं सायणदिशा प्रतिपाद्यताम्।

## Unit-III

### (निरुक्ते प्रश्नाः)

**4.** अधोलिखितेषु निरुक्तवचनेषु *द्वयो* आचार्ययाष्कदिशा व्याख्या कार्या। 5×2=10

(a) समाम्नायः समाम्नातः, स व्याख्यातव्य, तमिमं समाम्नायं निघण्टव इत्याचक्षते। निघण्टवः कस्मात्?

(b) इन्द्रियनित्यं वचनमौदुम्बरायणः।

(c) अथ निपाताः। उच्चावचेष्वर्थेषु निपतन्ति।

---